# 2014

## M.A. Part - I Examination

## SANSKRIT

### Paper I

Time : 4 Hours

Full Marks : 100

*The figures in the margin indicate Full Marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### First Half
### (Marks - 60)
### Unit - I

1. अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवतानिर्देशपूर्वकं मन्त्रद्वयोः संस्कृतभाषया व्याख्या कार्या - 8 x 2

a) अग्निना रयिमश्नवत् पोषमेव दिवेदिवे।
यशसं वीरवत्तमम् ।।

b) वायो तव प्रपृञ्चती धेना जिगाति दाशुषे।
उरुची सोमपीतये।।

c) वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू।
तावा यातमुप द्रवत्।।

d) दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः
आ यातं रुद्रवर्तनी।।

e) चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती।।

2. अधोनिर्दिष्टासु भाष्यपंक्तिषु कयोश्चित् द्वयोः व्याख्या कार्या 4 x 2

a) अग्निमीले इति सूक्तं प्रातरनुवाक आग्नेये कतौ विनियुक्तम्।

b) मित्रं हुवे इति मैत्रावरूणस्तृचो गवामयने -

आरम्भणीये चतुर्विंशेऽहनि प्रातः सवने -

मैत्रावरूणस्य स्त्रोत्रियः।

c) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या

d) सारस्वते तृचे या प्रथमा सा अन्वारम्भणी -

येष्टौ सरस्वत्याः पुरोनुवाक्या।

अथवा

निम्नलिखितेषु मन्त्रेषु द्वयोः भावार्थः संस्कृतभाषया विलिख्यताम्

a) सहस्रशीर्षा पुरूषः सहस्राक्षः सहस्रपात्।
सभूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्।।

b) न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं च नास।।

c) असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः।।

d) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।

3. शिवसंकल्पसूक्तानुसारं मनसः स्वरूपं प्रतिपाद्यताम्। 8

अथवा

सरस्वतीदेवतायाः वेदगतचरित्रिकं वैशिष्ट्यं विलिख्यताम्।





4. अधोलिखितेषु पदेषु द्वयोः व्याकरणदिशा साधनप्रक्रिया प्रदर्श्यताम्। 4 x 2

रत्नधातमम्, वक्षति, दाशुषे, दधे

अथवा

प्रथमप्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपादं प्रदर्श्य-
यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम्।

5. a) पञ्चमहायज्ञानां नामानि विलिख्य ब्रह्मयज्ञस्य वैशिष्ट्यं प्रतिपाद्यताम्। 10

अथवा

ऐतरेयब्राह्मणोक्तस्य शुनःशेपोपाख्यानस्य वैशिष्ट्यं प्रतिपाद्यताम्।

6. कठोपनिषदि वर्णितं नचिकेतसः तृतीयवरस्वरूपं समालोच्यताम्। 10

अथवा

a) सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां -
यदेव भगवान् वेद तदेव मे ब्रूहीति।।

b) अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः।।

c) न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वितमद्राक्ष्म चेत् त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव।।

उपरिलिखितानां द्वितयस्य भावार्थः सरलसुरगिरा प्रस्तूयताम्।

## Second Half
## (Marks - 40)

1. अधोलिखितासु निरूक्तपंक्तिषु कयोश्चित् द्वयोः यास्कानुसारं व्याख्या कार्या - 8 x 2

a) समाम्नायः समाम्नातः स व्याख्यातव्यः।

b) इन्द्रियनित्यं वचनमौदुम्बरायणः।

c) न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः

d) तत्र नामानि आख्यातजानि-इति शाकटायनो नैरूक्तसमयश्च।

अथवा

निर्वचनसिद्धान्तम् संक्षेपेण यास्कदिशा प्रतिपाद्यताम्।

2. निम्नाङ्किततेषु पदेषु त्रयाणां व्युत्पत्तिः यास्कानुसारेण प्रदेया- 3 x 3
नदी, समुद्रः, अग्निः, आचार्यः, अश्वः, आदित्यः

3. ऋग्वेदस्य प्राथम्ये सति यजुर्वेदस्य व्याख्यानमादौ कथं कृतम्? इति पूर्वोत्तरपक्षाभ्याम् सायणदिशा विवेच्यताम्। 15

अथवा

वेदः पौरूषेय अपौरूषेयो वेति सायणानुसारं प्रस्तूयताम्।